लोकप्रियशास्त्रीयग्रन्थमाला-३

आचार्यकृष्णमाधवझा-विरचिता
आत्मतत्त्वविवेक-संक्षिप्त-व्याख्या

# विवेकार्थप्रकाशिकोपेतः

संपादकः
अच्युतानन्ददाशः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# पुरोवाक्

हर्षस्यायं विषयो यदुदनाचार्यप्रणीतस्य आत्मतत्त्वविवेकाख्यग्रन्थरत्नस्य आचार्यकृष्णमाधवझाविरचिता विवेकार्थप्रकाशिकेति व्याख्या मूलग्रन्थसहितं प्रकाश्यते। मिथिलान्यायपरम्पराया आकाशे उज्ज्वलनक्षत्राणां पण्डितवरेण्यानां कृष्णमाधवझावर्याणां कृतिरियं अद्यावधि अप्रकाशिता आसीत्। व्याख्येयम् आत्मतत्त्वविवेकस्य क्लिष्टदुरूहानंशान् सविशेषं ग्रन्थग्रन्थ्युन्मोचनपुरस्सरं विशदयति। अतीतेषु केषुचिदब्देषु तेषामेव पण्डितप्रवराणां कृष्णमाधवझावर्याणां प्रथितयशस्कैरात्मजैः श्रीमद्भिः किशोरनाथझामहोदयैरस्या मातृका स्वात्मजकल्पाय विपश्चिद्वराय श्रीमदच्युतानन्ददाशाय दत्ता। आचार्यो दाशो महता परिश्रमेण मूलग्रन्थसंवलितां टीकां सम्पादयामास। राष्ट्रियसंस्कृतसंस्थानेनास्य प्रकाशनं प्रतिश्रुतमासीत्। किन्तु अहह कष्टमपण्डितता विधेः, सम्पादनकार्यं अवसितप्रायम्, आगामिनि मासे सर्वथा शुद्धतया टङ्कितां ग्रन्थस्य प्रतिं समर्पयिष्य इति प्रतिश्रुत्य दाशवर्योऽत्रान्तरे आकस्मिकतया स्वीयं पार्थिवशरीरमत्यजत्। अथ कथञ्चिच्छोकसागरमतिदुस्तरमुत्तीर्य तस्य भार्या तदीयसङ्गणकयन्त्रादिमां तत्सम्पादितां मातृकामुद्धृत्य विदुषस्तस्य अन्तिमं महनीयमिदं कार्यमस्मभ्यं प्रकाशनायाददात्। अच्युतानन्ददाशाय अच्युतं स्वीयं स्नेहं स्मरद्भिः श्रीमद्भिः किशोरनाथझावर्यैः मुद्रणस्थमिदं कार्यं महता श्रमेण निरीक्षितं संशोधितं च। तेषामेव किशोरनाथझामहोदयानां गुरुभ्रातरः साक्षाच्च शिष्याः श्रीमत्कृष्णमाधवझावर्याणाम्, अशेषशास्त्रपारावारपारीणाः मान्याः दार्शनिका गोस्वामिश्याममनोहरवर्या गुरुभ्रातुरनुरोधात् कृपया टीकाकर्तुः परिचयम् अस्य च ग्रन्थस्य स्वोपज्ञमुपोद्घातं च लिखित्वा अददुः। एतेषां ज्येष्ठानां पण्डितानां किशोरनाथझा-गोस्वामिश्याममनोहराणां चानुग्रहेण तच्छिष्यकल्पस्य दिवङ्गतस्य श्रीमतः अच्युतानन्ददाशस्य सम्पादनकार्यमिदं प्रकाशमायाति, एतयोः उभयोः कृते सादरं धन्यवादान् अर्पयामः। श्रीमतः अच्युतानन्ददाशस्य धर्मपत्न्यः पद्मादाशमहोदया अपि अस्माकं कृतज्ञताया पात्रम्, याभिर्ग्रन्थस्य मातृका यन्त्रान्निष्कास्य प्रेषिता। प्रकाशनेनानेन असमयं निधनमुपागतस्य दाशमहोदयस्यात्मा प्रसादमनुभविष्यतीत्याशास्महे।

**राधावल्लभः त्रिपाठी**

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्

= केनाऽपि प्रमाणेन उपलम्भगोचरत्वे वा न अवस्तु भवितुमर्हति। **द्वितीय** आह – **समानत्वादिति**। अत्रापि प्रमाणापेक्षाया आवश्यकत्वादित्यर्थः। **अनुपलम्भस्यापि अभावग्राहकत्वे प्रमाणमेव मूलम्।** अनुपलम्भमात्रं तु केवलम् अतन्त्रम्। स्वादृष्टि–सर्वादृष्टि–विकल्पकवलितत्वादिति भावः। यथा अवस्तुनि वक्तृत्वस्य अनुपलम्भेन वस्तुत्वव्याप्यत्वं, तथा अवक्तृत्वस्यापि अवस्तुनि अनुपलम्भेन वस्तुत्वव्याप्यत्वं स्यात्। तथा च अवस्तुनि विरोधाद् अवक्तृत्वमपि न सिद्ध्येदित्यर्थः।

**तद्विविक्तविकल्पमात्रं तावदस्तीति चेत्, तत्संसृष्टविकल्पनेऽपि को वारयिता। ननु वक्तृत्वं वचनं प्रति कर्तृत्वं तत् कथमवस्तुनि तस्य सर्वसामर्थ्यविरहलक्षणत्वादिति चेत् अवक्तृत्वमपि कथं तत्र तस्य वचनेतरकर्तृत्वलक्षणत्वादिति। सर्वसामर्थ्यविरहे वचनसामार्थ्यविरहो न विरुद्ध इति चेत्, अथ सर्वसामर्थ्यविरहो बन्ध्यासुतस्य कुतः प्रमाणात् सिद्धः? अवस्तुत्वादेवेति चेत्, नन्वेतदपि कुतः सिद्धम्? सर्वसामर्थ्यविरहादिति चेत्, सोऽयमितस्ततः केवलैर्वचनैर्निर्धनाधमर्णिक इव साधून् भ्रामयन् परस्पराश्रयदोषमपि न पश्यति।**

**क्रमयौगपद्यविरहादिति चेन्न, तद्विरहसिद्धावपि प्रमाणानुयोगस्यानुवृत्तेः। सुतत्वे च परामृष्यमाणे तदविनाभूतसकलवक्तृत्वादिधर्मप्रसक्तौ कुतः क्रमयौगपद्यविरहसाधनस्यावकाशः, कुतस्तरां चावस्तुत्वसाधनस्य कुतस्तमां चावक्तृत्वादिसाधनानाम्। तस्मात् प्रमाणमेव सीमा व्यवहारनियमस्य तदतिक्रमे त्वनियम एवेति।**

शङ्कते – **तद्विविक्तेति**। वक्तृत्वविविक्त– अवस्तुविकल्पमात्रमित्यर्थः। बन्ध्यासुतो न वक्तेति वस्तुविवेकेन अवक्तृत्वं बन्ध्यासुते गृह्यत इति भावः। उत्तरयति – **तत्संसृष्टेति**। वक्तृत्वसंसृष्ट– अवस्तुविकल्पने इत्यर्थः। तथा च विपक्षवृत्तित्वग्रहात् न व्याप्तिबुद्धिः। बन्ध्यासुतो वक्तेति वक्तृत्वसंसृष्टवेदनमपि असत्ख्यातिरूपं त्वन्मते स्यादेव इत्यर्थः।

प्रत्यनुमाने बाधकमाशङ्कते – **नन्विति**। ननु बन्ध्यासुतः वक्तृत्ववान्, सुतत्वाद् इत्यनुमाने बाधः। वक्तृत्वस्य चेतनधर्मत्वेन अचेतने अलीके बन्ध्यासुते असत्वात्। वक्तृत्वं वचनं प्रति कर्तृत्वम्। तच्च कारित्वविशेषो वा तत्सामर्थ्यं वा ? द्वयमपि सामर्थ्यविरहिणि अलीके बन्ध्यासुते असत्त्वाद् इति चेत् ? न। बन्ध्यासुतः अवक्तृत्ववान्, अचेतनत्वाद् इति तवानुमाने बाधस्य तुल्यत्वात्। तथाहि – अवक्तृत्वम् इत्यत्र नञर्थः पर्युदासः प्रसज्यप्रतिषेधो वा? आद्ये पर्युदासः सदृशग्राही। तथा च वचनेतरकर्तृत्वरूपम् अकर्तृत्वम्। तच्च अलीके अवस्तुनि बन्ध्यासुते नास्ति। द्वितीयं प्रसज्यप्रतिषेधं स्वसाध्ये आशङ्क्य निषेधति – **सर्वेति**। सर्वसामर्थ्यविरहवति

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली